International Journal of Sanskrit Research 2016; 2(4): 20-22

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(4): 20-22
© 2016 IJSR
www.anantaajournal.com
Received: 09-05-2016
Accepted: 10-06-2016

**Naveen Bhat**
Research Student, Veda Vijnana Shodha Samsthanam, Tumkur University, Karnataka, India

**Dr. Ramachandra G Bhat**
Veda Vijnana Shodha Samsthanam, Tumkur University, Karnataka, India

**Correspondence**
**Naveen Bhat**
Research Student, Veda Vijnana Shodha Samsthanam, Tumkur University

# दार्शनिकाः मन्त्रद्रष्टारः

**Naveen Bhat, Dr. Ramachandra G Bhat**

**सारंश**

समग्रस्य विश्वस्य वेदः अत्यन्तप्राचीनतमः वाङ्मयः वर्तते । अस्य समस्तधर्मशास्त्रदार्शनिकग्रन्थानाम् आधारभूतत्वात् समस्तप्राणिकुलहितार्थत्वाच्च भारतीयपरम्परायां प्रामाण्यं सर्वैरास्तिकैः समानरूपेणाभ्युपगतं वर्तते।

**उक्तं च मनुनाः-**

- वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च ॥[1]
- यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥[2]
- चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्। भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति ॥[3]

**भगवता कृष्णदैपायनेनापि महाभारते भणितंः-**

- अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥[4]

अतः वेदः एव पितृदेवमनुष्याणां सर्वेषामपि सनातनं चक्षुः। ईदृशी आस्तिक्यबुद्धिः नः सर्वेषामपि वेदप्रामाण्यवादिनां अन्तःकरणे दरीदृश्यते। "विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिः धर्मादिपुरुषार्थाः इति वेदाः" इति विद्-धातुनिष्पन्नत्वात् वेदस्य ज्ञानार्थत्वं,लाभार्थत्वं च दर्शितं ऋग्वेदप्रातिशख्ये । सर्ववेदभाष्यकारेण सायणाचार्येणापि अयमेवाभिप्रायः प्रकटितः स्वीयायाम् ऋग्वेदभाष्यभूमिकायाम् –" इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः" इति । वेदस्य स्वरूपविचारे बहवः विचाराः प्रकटिताः विद्वद्भिः, सर्वप्रथमं बौधायन-आपस्तम्बप्रभृतिभिः सूत्रकारैः "मन्त्रब्राह्मणयोः वेदनामधेयम्" इति मन्त्रब्राह्मणात्मकं स्वरूपं वेदस्य इति निर्धारितम्| आस्तिकनास्तिकदर्शनयोः भेदस्य प्रमुखं साधनमपि वेदप्रामाण्यमेव। चार्वाक. जैन. बौद्धादिनास्तिकानां नास्ति वेदप्रामाण्यबुद्धिः । अतः समग्रैः आस्तिकैः दार्शनिकैः यानि दर्शनतत्त्वानि प्रतिपादितानि, तेभ्यः वेद एव मूलम्, मन्त्रद्रष्टारः ऋषय एव यथार्थदार्शनिकाः ॥

**कूटशब्दाः-** दर्शनानां वेदमूलत्वम् । वैदिकधर्मस्य वैशिष्ट्यम् । ऋग्वेदस्य स्वरूपम् ।

## प्रस्तावना

आस्तिकदर्शनेषु यद्यपि ईश्वरादिप्रमेयविषये मतभेदो विद्यते तथापि वेदप्रामाण्यविषये समानास्तिक्यबुद्धिः दृश्यते । वेदे विप्रलिप्सादिपुरुषमतिदोषविरहितत्वात् तत्र समेषां प्रामाण्यबुद्धिः जागर्ति। वेदो न केनचित् पुरुषेण निर्मितः इत्यतः मतिभेदात् मतभेदः इति दोषं न पश्यामः। अतः तद्विषये सर्वेषां नः श्रद्धा वरीवर्तते। वेदाः ऋतम्भराप्रज्ञावद्भिः महर्षिभिः दृष्टाः सन्ति। तदुक्तंः-

- युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा॥ इति.

"जन्मना जायते शूद्रः" इति वचनात् ज्ञायते सर्वेषामपि मानवानां शूद्रत्वनिवारणपुरस्सरं गुणरूपसंस्कारम् आदधाति वेदः, यो मानवः द्विजोऽपि सन् वेदाध्ययनं त्यजति सः शूद्रत्वमेव ऋच्छति।

**तदुक्तंः-**

- योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।[5]
  वैदिकतत्वेष्वद्यतनविज्ञानादप्युदात्ततरवैज्ञानिकसिद्धान्तानां प्रतिपादनमस्ति।
- वैदिकधर्मस्य वैशिष्ट्यम्

अत्र धर्मस्य स्वरूपं, तद्वैशिष्ट्यं च प्राणिनां कृते तदुपयोगाय कथयन्ति। 'धृ' धातोर्निष्पन्नोऽयं 'धर्म' शब्दो धारणार्थ-

---

[1] (मनु-२-६,६)
[2] (मनु-२-६,७)
[3] (मनु-१२-९७)
[4] (महा.भा.शान्ति.२४४.५५)
[5] (मनु-२/१६८)

मभिव्यनक्ति। विश्वस्मिन् जगति सर्वेषां पदार्थानां द्रव्याणां च संयोजनेनैकत्र धारणेन च जीवननिर्वाहार्थं धर्मः प्रभवति । सूर्यश्चन्द्रमास्तारामण्डलं पृथिवी च परस्परोपकार्यो-पकारकभावेन सह धृतानि परमेश्वरेण निर्दिष्टानि स्वविशिष्टानि कार्याणि कर्तुं प्रभवन्ति, "भीषास्मात् वातः पवते"इति श्रुतेः । विभिन्नमानववृत्तीनां व्यष्टिभूतानां मानवानामेकत्र स्थित्यापादनमेव समाजस्य समाजत्वं नाम । अत एव समाजस्य धर्म एव प्रतिष्ठा। न केवलं मानवसमाजस्य, प्रत्युत विश्वस्य जगतः प्रतिष्ठा धर्म एव। तथा च श्रुतिवचनं समुपजृम्भते :- 'धर्मो विश्वस्य जगतः प्रतिष्ठा' इति ॥

'चोदनालक्षणोर्थो धर्मः' । चोदना नाम वेदप्रतिष्ठितैः मन्त्रैः प्रतिपाद्यमाना विधिरूपा प्रेरणैव । धर्मस्य प्रतिपादकत्वं नाम वेदे एव मुख्यतया उपयुज्यते । अत एव वेदस्याकुण्ठितां शक्तिं सम्प्रदायविदो दर्शयन्ति । तथा 'चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुम्'[6] इति। वेदस्य प्रामाण्यत एव स्मृतीतिहासादीनामपि प्रामाण्यं दुर्निवारं स्मृतेर्वेदमूलकत्वात् लोकप्रसिद्धेस्तदुभयमूलकत्वात् च । ततश्चापौरुषेयेण वेदेन प्रतिपादितत्वात् धर्मस्यापौरुषेयता दुर्निवारा। धर्मस्य लक्षणं तु 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति। श्रुत्या यानि कर्माणि विधिरूपेण विहितानि, तानि धर्म इति कथ्यन्ते। यानि च कर्माणि निषिध्यन्ते श्रुत्या, तानि अधर्म इति मन्यन्ते, धर्माधर्मव्यवस्थायां वेदस्य परप्रामाण्यात्। तथा च विद्यते श्रीमद्भागवते व्यासस्य गम्भीरार्थप्रतिपादकं वचनम् – वेदप्रणिहितो धर्मः ह्यधर्मस्तद्विपर्ययः ।वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ॥[7]

धर्मस्याश्रयणेनैव इहलोके प्राणिनामभ्युदयः सञ्जायते, अमुष्मिन् लोके निःश्रेयसरूपा मुक्तिश्चोपलभ्यते । धर्मस्य धारकत्वं श्रीवेदव्यासो नानावचनैर्महाभारते प्रतिपादयति "धारणाद् धर्म इत्याहुर्धर्मेण विधृताः प्रजाः । यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः" ॥[8]

**ऋग्वेदः दर्शनस्य मूलस्रोतः**

दृश् धातुना निष्पन्नः,दृश्यते अनेन इति व्युत्पत्तिसिद्धश्च दर्शनशब्दः भवति । अत्र सत्यभूतस्य तात्विकस्य स्वरूपज्ञानमेव दर्शनशब्दवाच्यं भवति। अर्थात् दृश्यमानस्य स्थावर-जङ्गमात्मकस्य जगतः तात्विकं स्वरूपं किम् ? अस्याः सृष्टेः उत्पत्तिः कुतः सञ्जाता ? जन्तूनां स्थितिगतिः कुतः संभवति ? इत्येते अलौकिकाः प्रश्नाः कदाचित् अनुत्तरिताः तथैव तिष्ठन्ति । अतः तादृशसूक्ष्मविषयाणां साक्षात्कारः वेदेन भवति, तदुक्तं भगवता शङ्कराचार्येण "अलौकिकेषु विषयेषु श्रुतिश्च नः प्रमाणम्" इति। उक्तं च - श्रोतव्यं श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तितः। मत्वा च सततं ध्येयः एते दर्शनहेतवः इति ॥

तत्र दर्शनकाराश्च द्विविधाः श्रौताः तार्किकाश्च ।तत्र श्रुतिरेव मुख्यतया मूलतत्त्वान्वेषणे साधनम्। तामन्तरेण मूलतत्वान्वेषणं दुर्लभमित्येवं मन्वानाः श्रुत्येकशरणाः श्रौताः । अत एव वेदवादिन इति व्यपदिश्यन्ते । जगत्कारणवादिष्वतिपरोक्षभूतेष्वर्थेषु श्रुत्यनुसारेणैव तेऽर्थं निश्चिन्वन्ति । श्रुतिप्रतिपादितोऽर्थश्चापाततो विरुद्धत्वेन सर्वतोऽसम्भवित्वेन वा भासमानोऽपि सत्य एवेति हि तेषां दृढनिश्चयः । न हि वेदप्रतिपादितेऽर्थेऽनुपपन्ने वैदिकानां बुद्धिः खिद्यते । अपि तु तदुपपादनमार्गमेव विचारयतीति हि वैदिकसम्बन्धेन सायणमाधवाचार्यैरुक्तम् ।[9] श्रुतिविरुद्धोऽर्थोऽनुमानेन केनचित्साधितश्चेत्तदनुमानं न प्रमाणं किन्तु प्रमाणाभास एव । एवं स्मृतिरपि । जैमिनिरप्येवं सूत्रयामास, "विरोधे त्वनपेक्षं स्यादसतिह्यनुमानम्" [10]। जैमिनिरिव पाणिनिदर्शनमपि श्रौत एव। यतः पाणिनीये नये हरिणोक्तं वाक्यपदीये –

- न चागमादृते धर्मस्तर्केण व्यवतिष्ठते। ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ॥
- धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः। न ताँलोकप्रसिद्ध-त्वात्कश्चित्तर्केण बाधते ॥
- अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु । भावानामनुमानेन प्रसिद्धिरति-दुर्लभा ॥ [11]
- चैतन्यमिव यश्चायमविच्छेदेन वर्तते। आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ॥ [12] इति।

एवं चिन्तितस्य निर्णयः अयम्, श्रौताः दार्शनिकाः एव यथार्थदार्शनिकाः न मतिमितियुक्ताः तार्किकाः, तत्रापि ऋग्वेदे मन्त्रदृष्टृत्वेन सूचिताः ऋषयः एव मूलदर्शनिकाः अन्ये श्रौताः अपि एतान् अनुधावन्ति । अतः समस्त मन्त्रब्राह्मणात्मकः ऋग्वेदः दर्शनिकः ग्रन्थः वर्तते।

समग्रं वेदं निष्पीड्य आलोडयामश्चेत् त्रीणि सूत्राणि लभ्यन्ते – कर्मसूत्रम्, उपासनासूत्रम्, ज्ञानसूत्रम् । वेदार्थचिन्तकेषु ऋषिषु बादरायणमतानुसारं सर्वसूत्राणामपि ज्ञानसूत्रमेव अवसानभूमिः । वैयासिकसूत्राणामवलोकनेनेदं ज्ञायते । बादरायणाचार्यः जैमिनेः वेदमन्त्राणां कर्मपरव्याख्यानं तत्र तत्र निराकरोति, यथा "एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः" इत्यस्मिन् सूत्रे कर्मतत्फलविषयिणीं चर्चां विधाय व्यवहारापेक्षया व्यवहारापेक्षया केवलं कर्मणः उपादेयत्वं साधयामास। "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" इत्यस्मिन् सूत्रे उपासनसूत्रस्य महत्वं साभिमानं स्वीकरोति बादरायणः । "आम्नायस्य क्रियार्थत्वादानर्थक्यम् अतदर्थानाम्" "विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति च वदता जैमिनिना समग्रस्य वेदस्य कर्मप्राधान्यं प्रतिपादितम्। सङ्कर्षणेन उपासनाप्राधान्यं प्रतिपादितम्, पृथक् सूत्राण्यपि व्यरच्यन्त । वेदार्थचिन्तकेषु ऋषिषु ज्ञानपारम्यमेवबहुमन्यमानाः ऋषयः बहुसंख्याकाः इति ब्रह्मसूत्रतः ज्ञायते । काशकृत्स्नः, कार्ष्णाजिनिः, औडुलोमिः, बादरिः, इत्यादयः ऋषयः समस्तस्य वेदस्य आत्मदर्शनपरत्वं प्रतिपादयन्तीति प्रतीयते । प्रायेण जैमिनिना यत् कर्मपारम्यं प्रतिपाद्यते तत्र आत्रेयनामा ऋषिः कर्मानिष्ठान-कर्मफलादिविषये न्यस्तमस्तिष्क इव प्रतीयते । आत्रेयः कर्माङ्गोपासनेषु निर्भरः इति "स्वामिनः फलश्रुतेरित्यात्रेयः" [13] इति सूत्रेण ज्ञायते। फलं स्वामिगामि उत ऋत्वग्गामि इत्यादि विषये संशये उत्पन्ने आत्रेयः कर्मफलं प्राधान्येन स्वामिनमुपगच्छतीति अभिप्रैति। स्वामिनः एव फलवत्सु उपासनेषु कर्तृत्वमिति आचार्यः आत्रेयः मन्यते । ईत्थम् – जैमिनिमात्रेयञ्च अतिरिच्य अन्ये वेदव्याख्यातारः बादरायणवत् ज्ञानपारम्यमेव बहुमन्यमानाः इति स्पष्टमवगम्यते ।समग्रे ऋग्वेदे एकदेवतावादः अस्तीति पाश्चात्यः विद्वान् म्याक्समुल्लर् अपि भणाति।

दशमण्डलात्मके ऋग्वेदे त्रयस्त्रिंशद्देवताः सप्तलोकान्तर्वर्तिन्यः ब्रह्माण्डान्तर्गताः वर्ण्यन्तेति बृहद्देवताग्रन्थकारः शौनकः अभिप्रैति । तथा अन्ये देवतामीमांसकाः आशेरते अयं च आशयः आधिदैवकदृष्टिमतां व्याख्यातृणामेवेति स्पष्टमेव । आध्यात्मिकदृष्ट्या बाह्वृचानि सूक्तानि व्याचक्षाणाः सकलदेवतान्तर्वर्ति बह्मतत्वमेव बहुमन्यमानाः भवन्तीति सायणादिभाष्यावलोकनेन कपालिशास्त्र्यादिरचित-आधुनिकव्याख्यावलोकनेन च अवगम्यते।

अस्यावामीयसूक्तस्य एकः मन्त्रः विशेषस्थानं भजते "इन्द्रं मित्रं वरुणमग्निमहुरथो दिव्यः ---------- एकं सत् विप्राः बहुधा वदन्ति" एकं सत् तत्वं समग्रऋग्वेदे इन्द्रनामादिभिः स्तूयते इति सर्वेषां नः विदितमेव। देवतानां नाना नामानि रूपाणि च आपाततः भिन्नत्वेन प्रतीयमानान्यपि अन्ततः गत्वा शब्दे रूपे ब्रह्मणि पर्यवस्यन्ति इति न अविदितमेव विदुषाम् ॥

अग्न्यादयःपृथिवीस्थानीयदेवताः, वरूणादयः अन्तरिक्षस्थानीयदेवताः, आदित्यादयः द्युस्थानीयदेवताः, विविधच्छन्दोविषयकमन्त्रैः काव्यात्मना वर्ण्यन्ते ऋग्वेदे इति ज्ञाप्यन्ते । "त्रातारमिन्द्रमवितार" "अग्निमीळे पुरोहितम्" इत्यादिमन्त्रतः आकारप्रकारादिवत्यः देवताः वर्ण्यन्ते इति यद्यपि केचन भाष्यकाराः अभिप्रैयन्ति, तथापि नामरूपात्मकजगतः द्वैतात्मकवैविध्यवर्णने ऋषीणां तात्पर्यं नास्तीति स्पष्टमवगम्यते ॥

ब्रह्मसूत्रे "तदुपर्यपि बादरायणः सम्भवात्" [14] इत्यधिकरणभाष्ये देवतानां विग्रहवत्वादिविषये सविस्तरां चर्चां वितन्वानः शङ्करः "ज्योतिषिभावाच्च" [15] इति सूत्रे मानुषादिदेहराहित्यं ज्योतीरूपत्वं च इन्द्रादिदेवतानां प्रतिपादयामास । एताः ज्योतिर्मयाः देवताः स्वस्वरूपेण सदभिन्नाः इति कारणतः समग्रऋग्वेदः अद्वितीयात्मपरः इति वेदडिण्डिमतः आत्मा एव वेद्यते इति ।

[6] शाबरभाष्ये (१।१।२)

[7] (भाग. ६।१।४०)

[8] (महा.शान्ति. १०९।११)

[9] (सर्वद.द.१६पं. २६१)

[10] (जै.सू. १।३।३)

[11] (वा. १.३०-३२)

[12] (वा. १।४१)

[13] (ब्रह्म-०३/०४/४४)

[14] (ब्रह्म- ०१/०३/२६)

[15] (ब्रह्म ०१/०३/३२)

जैमिनिप्रभृतिदार्शनिकापेक्षयापि यथार्थदार्शनिकाः मन्त्रब्राह्मणात्मकस्य वेदस्य द्रष्टारः मधुच्छन्दादि ऋषयः एव, अयमेव अन्तराशयः वेदान्तदार्शनिकेन शङ्कराचार्येण ब्रह्मसूत्रभाष्ये प्रतिपादितम् "ऋषीणामपि मन्त्रब्राह्मणदर्शिनां सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम्" [16] इति।

**ग्रन्थसूची :-**


१) सायणमाधवः, सर्वदर्शनसङ्ग्रहः, भाण्डारकर् प्राच्यविद्यासंशोधन मन्दिरम्, पुण्यपत्तनम्, १९७८.

२) शास्त्री आचार्यजगदीशः, ब्रह्मसूत्रशङ्करभाष्यम्, मोतिलाल् बनारसीदास्, वाराणासी २००५.

३) शास्त्री कपालिः, collected works of T.V Kapali Shastri, दीप्तिप्रकाशनालयः, पुदुच्चेरि, १९८८.

४) उपाद्यायः बलदेवः, संस्कृतवाङ्मय का इतिहास, उत्तरप्रदेह्श संस्कृत संस्थानम्, लखनौ २००६.

५) सायाणाचार्यः, ऋग्वेदभाष्यभूमिका, चौखाम्बा कृष्णदास् अकाडेमी, वाराणासी, २००५.

६) भार्तृहरी, वाक्यपदीयम्, मोतिलाल् बनारसी दास् वाराणासी, १९७१.

७) मनुः, मनुस्मृतिः, Pt, dav Lahore, लाहोर्, १९१३.

८) सायणाचार्यः, ऋग्वेदसंहिता, वैदिकसंशोधनमण्डलम्, पुणे १९९५.


[16] (ब्र.सू-१/३/३३)